International Journal of Sanskrit Research 2023; 9(4): 08-11

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(4): 08-11
© 2023 IJSR
www.anantaajournal.com
Received: 05-05-2023
Accepted: 08-06-2023

**Dr. Pranab Kumar Bar**
Assistant Professor in Sanskrit,
Ghatal Rabindra Satabarsiki
Mahavidyalaya, Ghatal,
Paschim Medinipur,
West Bengal, India

**Corresponding Author:**
**Dr. Pranab Kumar Bar**
Assistant Professor in Sanskrit,
Ghatal Rabindra Satabarsiki
Mahavidyalaya, Ghatal,
Paschim Medinipur,
West Bengal, India

# आधुनिकसंसकृतलघुकथायां नूतनशब्दनिर्माणम्

**Dr. Pranab Kumar Bar**

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i4a.2141

**सारांश**
नवशब्दसृष्ट्यर्थं संस्कृतस्य सामर्थ्यमस्तीति न वा इति विचारः अत्र आदौ कृयते। सर्जनात्मकसाहित्ये प्रयोगानां परीशिलनम् अपि करणीयः। परिदृश्यमाननवशब्दानामभावः अपि चर्चिता। प्रासङ्गिकतया चिन्तितं आधुनिकसाहित्यसर्जनकाले नवशब्दसर्जनस्य प्राम्भिकोपायाः। तदा दृष्टं नवशब्दनिर्माणसमस्यायां सर्वाग्रे आपतन्ति अनुवादकाः एव। संक्षिप्ततया प्रन्तियभाषाणां प्रभावः परिशिलितः।

कूटशब्दः नवशब्दः, नूतनशब्दः, शब्दनिर्माणम्, संसकृतलघुकथा, अनुवादः

## प्रस्तावना
आहारं विना जीवनं यथा न प्रचलति तथैव नूतनशब्दान् विहाय भाषाव्यवहारोऽपि न स्वास्थकरः तिष्ठति। नूतनशब्दानां निर्माणे स्वेच्छया यथेच्छः व्यवहारः न युक्तः। यदि प्राज्ञाः शब्दान् निर्माय दद्युस्तर्हि व्यवहारः सुकरः। प्रसङ्गेन महाभाष्यकारस्य कुलालस्य कुम्भनिर्माणवत् वैयाकरणसमीपं गत्वा“ शब्दं निर्मातु ”इति व्यबहारप्रसङ्गस्य स्मरणमायाति। महाभाष्यकारेण कालस्य यस्मिन् खण्डे उक्तं नूतनशब्दनिर्माणं वैयाकरणानां कार्यं न इति, तत् शिष्टजनगणस्य बाग्व्यवहारादेव जायते। तस्मिन् काले संस्कृतं जनानां व्यवहारिकभाषा आसीदिति निर्विवादितं सत्यम्।[i] श्रुयतैवं यत् प्राचीनकाले “शिष्टमण्डल्यः ”भवन्ति स्म इति। ताः शिष्टमण्डल्यः शब्दचिन्तनं वाक्यपरिष्कारं च कुर्वन्ति स्म। भाषाविषये ताः मार्गदर्शिकाः प्रमाणभूताश्चासन्निति डॉ.क.वें.रामकृष्णमाचार्येण निगदितम् सम्भाषणसन्देशे [ii], तत्रैव तेन व्यवहारे सौकर्यसम्पादनार्थं“ शब्दशाला”नाम परिकल्पितायाः कस्याश्चिद्योजनायाः उल्लेखः कृतः, यया नूतनशब्दानां सृष्टिर्भवेत्। यस्य फलस्वरूपं नवोदितानां पारिभाषिकाणां शब्दानां विपुलसम्भारः अद्यत्वे सर्वासामपि भारतीयभाषाणामुपकाराय जातः। वस्तुतः शब्दकोशे न उपलभ्यते चेत् सः अपशब्दः इति कथं अङ्गीकारः भवेत्, तदा ते असाधवः, अस्वीकरणीयाः इत्यपि न। शब्दाः साधवश्चेत् तेषां प्रयोगः अपि विधेयः। जीवितभाषारूपेण प्रचलद्भाषारूपेण वा यदि संस्कृतस्य व्यवहारः करणीयः तर्हि तत्र नवीनानां शब्दानामङ्गीकरः करणीयः एव।“ नवसर्गगते .....नवशब्दाः अपि न विद्यते ” इत्यादिनिन्दावचः अपि स्मर्तव्यः अत्र। तत्र खलु अयमाशयः एव प्रोत्साहितः भवति। संस्कृतस्य तादृशः सामर्थः तु भवति एव, किन्तु नवीनशब्दनिर्माणावसरे जनानामवगमक्लेशः, व्याकरणदोषः, काठिन्यम् – इत्यादीनां विषयेऽपि लेखकानां जागरुकता भवेत्।

नवशब्दसृष्ट्यर्थं संस्कृतस्य सामर्थ्यमस्तीति सत्यमेव। परं संस्कृतं विशेषतया शब्ददारिद्र्यमनुभवतीत्यपि तिरस्कर्तुमनर्हं कटुसत्यम्। सहस्राधिकवर्षाणि यावत् संस्कृतं संख्यागरिष्ठानां व्यवहारपथे नासीत्। फलतः संस्कृतजगति नूतनशब्दानां सृष्टिः स्थगितप्राया आसीत्। कालस्तु तावता वेगेन परिवर्तमानः अस्ति यत् प्रतिदिनं नूतनानि सहस्रशः वस्तूनि दैनन्दिनजीवनं प्रविशन्ति, तेषां निर्देशार्थं शब्दास्तावत् आवश्यकाः एव।

सर्जनात्मकसाहित्ये परिस्थित्यनुगुणं नामधातोः प्रयोगः कुर्वन्ति कवयः। तत्र प्रायः प्रान्तीयभाषायाः प्रयोगस्य अनुसरणम् अनुरणनं पश्यामः। यथा' प्राश्नयद् 'इति प्रयोगं करोति रवीन्द्रपण्डा' अपृच्छत् 'अस्मिन् अर्थे, तथैव 'प्रश्नयति 'इति' पृच्छति 'इत्यस्मिन् अर्थे। [iii] तत्र प्रान्तीयभाषाणां भाषिकप्रयोगगतार्थविधानानां संस्कृतेऽपि अनुवर्तनं कारयन्ति लेखकाः ज्ञाततया कदाचित् अज्ञाततया।

अत्यत्र इयं पृथिबी इति कथायां तारापदभट्टाचार्येण चिक्रुडमवगामयितुं" काष्ठमार्जारी"इत्यस्य प्रयोगं कृतवान्।" काष्ठमार्जारी बृक्षमधिरोहति "अत्र "काठवेडाली "इति बङ्गीयशब्दस्य संस्कृतप्रतिशब्दत्वेन "काष्ठमार्जारी "इति साक्षात् अनूदितरूपं स्वीकृतं तेन। प्रान्तीयभाषायाः प्रभावात् एतादृशानां शब्दानां यथेच्छग्रहणेन संस्कृतस्य हानेः एव सम्भवना तिष्ठति। बैदेशिकशब्दावलिन् प्रान्तीयभाषायाः शब्दावलिन् च यथावत् संस्कृते ग्रहणस्य प्रवणता अस्ति एव, सामान्यतः तस्य संस्कृतीकरणं प्रचलितम्, तत्र सावधानता अवलम्बनीया, यत् कदाचित् नवीनपाठकानाम् अवगमनाय क्लेशकरं न भवेत्, संस्कृतस्य मर्यादापि रक्षिता भवेत्। कानिचन उदाहरणानि पश्यामः —आरवी फर्शी इति' -फरासस्य उपरि आसनं जगृहुः'[iv]। आङ्ग्ल्य चेयार इति' -ततश्चेयारस्य पृष्ठे देहं दत्त्वा चरणान्दोलितौ चकारः' [v]। आङ्ग्ल्य टेविल इति -नन्दः टेविलस्योपरि कानिचित् पुस्तकानि वेणीयुगलमपि ददर्शः' [vi] । फार्सी वरादमह्, आङ्ग्ल्य Veranda, बांला बारान्दा -इत्यस्य 'वारान्दातः काचित् विद्युद्वेगेन अभ्यन्तरं विवेश' [vii] । Lemonade इति शितपेयम्' -सुहृदौ धावन्तौ लोमनेडम् आनीतवन्तौ' [viii] । ह्याजाक्- इति' आनीतश्च ह्याजाङ्नामको दृहतप्रदीपः'[ix]। Egg Poach इति' -पोचं प्रणितम्' [x] । Motor-इति' मरूत्तर' [xi] । Bicycle -'वायुशकल 'कथानकवल्ली, कलानाथशास्त्री । वकिल इति' -वावकीलः' [xii] । Railway Sation- इति 'स्टेसनोपरि'[xiii]। College- इति' कलेजस्य'[xiv]। खेदेन एव वक्तव्यं यत् एतादृशी सरलिकरणप्रवणता संस्कृतस्य भूषणं न भूत्वा दुषणमेव भवेत्।

ये सर्जकाः अधुनिकस्थितिं वक्तुकामाः, तेषां सविधे नवशब्दानामभावः सर्वदैव पीडयति तान्। भट्टमथुरानाथशास्त्री सदृशानां लेखकानाम् तु तत् स्वाभाविकमेवासीत्। साम्प्रतिकं घटनां वर्णयन् सः नूतनशब्दानां सर्जने मत्तः अभवत्, कदाचित् इतरभाषातः अपि तेन शब्दानामाहरणं कृतम्। रेलयात्रायां प्लाटफर्म-एंजिन-टिकिट-इत्यादीनि यथावत् वर्णितानि तेन। जीवने पैंट-कोट-टुथब्रश-टुथपेष्ट-वासवेसिन-रेडिओ-ग्रामोफोन-इत्यादीनां शब्दानां प्रत्यक्षग्रहणं तेन कृतमिति दरीदृश्यते। वस्तुतः प्रसङ्गेऽस्मिन् गभीरतया विचारयामः चेत् पश्यामः तदानीन्तने काले उपायन्तरणमपि नासीदेव संस्कृतस्य आधुनिकलेखकानां सविधे। तदनु वैज्ञानिकपारिभाषिकशब्दावली [xv] इति आयोगस्य भारतसर्वकारस्य तत्वावधानेन प्रायः पञ्चलक्षाधिकं भारतीयशब्दाः अद्यत्वे संकलिताः, संगठिताः नूतनतया प्रकल्पिताः वा। किन्तु बिंशशताद्याः प्रारम्भे यत्काठिन्यं संस्कृतलेखकैः अनुभूतं तत् अद्यतनीयाः लेखकाः प्रायः अत्यल्पमेव अवगच्छेयुः। कदाचित् तदा उपायत्रयस्य आश्रयं ते कुर्वन्ति स्म। अत्र समुचितमार्गस्तावत्-

- प्रथमतः संज्ञाशब्दत्वेन तत् तत् भाषिकशब्दावलीमेव यथावत् अङ्गीकरणम्, यथा रेडिओ-ग्रामोफोन।
- द्वितीयतः ध्वनिसाम्यमाधृत्य संस्कृतव्याकरणस्य आनुकुल्यस्थापनस्य हार्दिकी प्रचेष्टा, यथा -मोटर – मरुत्तर, बाइसाइकेल – वायुशकल, वकील – वाक्कील, डॉक्टर – द्राक्तर इत्यादयः।
- तृतीयतः प्राचीनशब्दाः नूतनेन अर्थेन विलक्षणसामर्थ्येन प्रयुक्तवन्तः लेखकाः तद्यथाः बैट – लकुटम्, विकेट् – विकटम् इत्यादि। किन्तु एतेन समस्यानां परिहारः न जातः।

हेमचन्द्रादिभिः नूतनशब्दोपादानं निर्दिश्यते इति बिद्म वयं। वातायनं यथा सुविदितं तथैव खिडक्किका अपि हेमचन्द्रेण अङ्गीकृता। भट्टमथुरानाथमहाभागैः तथैव महलशब्दोऽपि संस्कृतभाषिकशव्दः इति कृत्वा प्रयुक्तः। "भाषान्तरीयशब्दानाम् अनर्थकप्रयोगः "इत्येवमंशान् दोषत्वेन विचारयन्ति साम्प्रतिकाः समालोचकाः। यथा पराम्बा योगमायायाः सम्पर्कः[xvi] इत्यस्य ग्रन्थस्य समीक्षायां राकेशदासेन लिख्यते" ...दोषाः सन्ति "इति। सत्यं ते दोषाः अपि विचारणीयाः वर्तते खलु, साम्प्रतिके एतादृशानां प्रयोगाः कदाचित् प्रान्तीयप्रभावरूपेणैव परिगणिताः भवेयुः।

एते प्रयोगाः कदाचित् इत्थमपि प्रकटयितुं शक्यते यथा - "निशाग्रस्त" – "मादकासक्तः"[xvii], "दायित्वं निभालयति " " –दायित्वं वहति" [xviii] , "कन्यामुखं निभालयति – " "कन्यामुखं पश्यति"[xix]... इत्यादि।

नवशब्दनिर्माणसमस्यायां सर्वाग्रे आपतन्ति अनुवादकाः एव। तैः प्रदर्शितमार्गेण अग्रे सरन्ति अपरापरसाहित्यिकाः। अनुवादकार्येण संस्कृतसाहित्यस्य प्रप्रथमम् उपकारः भवति बहूनाम् आधुनिकसंस्कृतशब्दानां निर्माणार्थम्। पुनश्च पारस्परिकसम्पर्काभावात् समानशब्दस्य द्वित्राः

ततोऽधिकं वा संस्कृतरूपान्तरणम् अपि क्रियते विविधैः लेखकैः येन संस्कृतस्य शब्दभाण्डारवृद्धिरूपः लाभ एव भवति। नुतनशब्दानां एकाधिकप्रतिशव्दादानामागमणेन कदाचित् संशयानां ज्योटिलतायाः वा सम्भावना तिष्ठत्येव। यथा -गाजरम्, गृञ्जनम्) Carrot); सम्पम्बरपरीक्षा )Supplementary); क्षुरपत्रम्, अदष्टपत्रम्) Bled); हस्तान्दोलनम्, सैतानः) handshake); दैनन्दिनी, वासिरिका) Diary); जङ्गमिका, जङ्गमदूरभाषा, चलद्दूरभाषा, चलभाषः)Mobile); शरारतीचेष्टालः, कुरूज्ञतिपरः, कफघ्नी, कषषायपेयः, अवस्थानकम् इत्येताद्दशानां शब्दानां निर्माणेन संस्कृते आधुनिकशब्दनिर्माणस्य शुभारम्भः तु जातः येन संस्थाविशेषेण आधुनिक-मानक-संस्कृतशब्दकोषः निर्मातुं शक्यते।

परन्तु अनुवादस्य वैफल्ये सति मूलसाहित्यरसः विनश्यति। अपि च कस्याश्चित् ख्यातसाहित्यस्य विश्वस्य अधिकाधिकभाषासु अनुवादसर्जनात् परं संस्कृते अनुवादः भवति चेत् विशेषता न तिष्ठेत्। अतः कस्याः अपि कृतेः प्रथमानुवादसर्जनस्य गौरवप्राप्तिरेव संस्कृतस्य अभीष्टा। तथा च ओडिया-बङ्ग-हिन्दी-कन्नड-मराठी-गुजराती-इत्यादिभाषीयानुवादकानां जागरुकता प्रचेष्टा च अन्यसर्वक्षेत्रीयभाषाणां संस्कृतज्ञैः अनुकरणीया तथा च स्वमातृभाषीयकृतीनां संस्कृतानुवादस्य मार्गे अग्रेसरणीयं निश्चयेनैव।

उच्चारणसाद्दस्याधारेण निर्मिताः नूतनाः शब्दाः यथा - पर्पटः)-पापड(, सर्वकारः)सरकार(, रूप्यकम्)रूपया(, गोलिका)गोली (इत्यादयः। सामान्यतः संस्कृतभाषां जनभाषां कर्तुं सरलशब्दानां निर्माणं क्रियते अनुवादकैः, येन अर्थः सहजतया बोधगम्यः भवेत् पाठकानाम्। यथा- 'कोष'इत्यस्य परिवर्ते धनागारः, 'सरपञ्च 'इत्यस्य परिवर्ते निर्णायकः इत्यादयः। पुनश्च विविधपरिस्थित्यनुसारं संस्कृते नूतनाः शब्दाः जायन्ते। यथा -निजव्यापारिणि समवायः )प्राईवेटकंपनी(, विषव्रणग्रन्थिः)ब्रेनट्यूमर (इत्यादयः।

नूतनशब्दनिर्माणम् -अद्यावधि अस्माभिः परिलक्ष्यते नूतनशब्दगठनोपलक्षेण किं किं न गठितवन्तः किं वा न त्रोटितवन्तः ते जनाः। उपन्यासे अपि सैव प्रचेष्टा अव्याहता दरीद्दश्यते। रयीश-कारेण आङ्गलशब्दानामपि प्रयोगः कृतः, यथा -जीपयानम्, हेलिकाप्टरविमानानि, फैक्सविधिना, वोटबैंकम्[xx] इत्यादयः। उपन्यासे लोकोक्तीनामपि प्रयोगः कृतः, यथा -व्रणे क्षार इव बङ्गभाषायां उच्चते "काटा घाये लवणेर मतो"[xxi] ।सरलसंस्कृतेन लिखितः प्रचलितसूक्तिप्रवचनैः सहितोऽयमुपन्यासः कालाय तस्मै नमः पोलिस-टिकेट-रैलस्थानक-त्रिचक्रशकट-पाथेयपेटिकादिशब्दान् उपायनीकरोति। परन्तु अन्यच्च-आचार्येण यत् श्लाघनीयं साधितमस्ति तत्तु पुरातनप्रसिद्धशब्दानां व्यवहारे आनयनम्। यथा -ठक्कुरः, तुम्बिकम्, प्रतन्वती, वीरुत्, अलसाला, फलिनी, शृङ्गाटकः, पतद्ग्रहः, शालाक्यं, शशः, स्त्रीयाजकः, कौमारभृत्यं, अंकोलः, अक्षोटः, परिवेणः, उपहस्तिका, हसन्ती, द्रङ्गः, कपिशीर्षकम्। समेषां सन्दर्भाः अपि दत्ताः सन्ति। तदानीन्तन-नगरनामानि अपि संस्कृतीकृतानि एव -भद्रपुरी)भदौही(, ऋषिरसा)सिरसा(, पुष्कलपुरम्)पेशावर(, इरावती)रावी(, शाकलपुरम् )स्यालकोटनगर(। एवमेव लौकिकन्यायानां मुहावराणां वाग्धाराणां वा संस्कृतीकरणं दर्शनीयमेव -कियतां घट्टानां वारि निपीतम्[xxii] इत्यादि। तत्र कारणद्वयं स्यात्। १. कनिष्ककाले कथावाचकस्य प्रापणम्, २ .विस्मृतप्रायाणां शब्दानामादर्शरूपेण प्रयोगः। उक्तं खलु महाभाष्यकारेण ' -एक :शब्द :सम्यक् ज्ञात :सप्रयुक्त :स्वर्गे लोके च कामधुग् भवति'[xxiii]... इति।

## उपसंहार

वस्तुतः नूतनशब्दनिर्माणस्य उद्देश्यम् अस्ति निर्वाधं सम्प्रेषणम्। पाठकः कथाकारस्य संदेशम् आत्मसात् कर्तुं शक्नुयात् अनायासेनैव। रसप्रवाहे कदापि वाधा न स्यात्। शिवसागर-त्रिपाठिवर्येण नवशब्द-निर्माणस्य वाध्यवाधकताविषये उक्तं यत् - भारतसर्वकारस्य शब्दावलि-आयोगे विगत-अर्धशतकं व्याप्य विचारचिन्तनस्य परिणामरूपेण भारतीयभाषाणां कृते ये शब्दाः निर्धारिताः, ते संविधानस्य २५१-तमधारानुसारं प्रामुख्येण संस्कृतनिष्ठाः वर्तन्ते। ते शब्दाः एव सर्वासां भारतीयभाषाणां शिक्षाक्रमे प्रयुक्ताः भविष्यन्ति, ये शब्दाः)संस्कृतनिष्ठाः (तत्र सन्ति। तेषां प्रयोगेण लेखक-पाठकयोः उभयोरेव समस्या दूरीभूता भविष्यति। ये शब्दास्तावत् संस्कृतनिष्ठाः न, तेषां कृते एव नूतनशब्दान् उत्पादयितुं प्रयासः करणीयः। तदपि पाणिनीयनियमानुसारेणैव। भाषायाः विकाशः परिवर्तनं तथा च परिवर्धनं शाश्वतं सततं प्रवाहशीलञ्च। संस्कृतभाषायां नवशब्द-निर्माणेन भाषायाः क्लिष्टता दूरीभूता भवति चेदपि भाषाशुद्धिकरणाय पाणिनीयनियमानां पालनविषयेऽपि अनुवादकैः ध्यानं स्थापनीयम्।

ईद्दशाधुनिकाभिव्यक्तीनां प्रकाशनाय प्राचीनपण्डिताः प्रखरप्रतिभया पाणिनीयसूत्राधारेणैव नूतनशब्दनिर्माणं कुर्वन्ति स्म। परं तु स्टेशन-चड्डि-बनियन-प्लाटफार्म-इत्यादीनां शब्दानाम् अनुवादः यदि सर्वे पण्डिताः स्व-स्व-बुद्ध्यनुसारं कर्तुमारभन्ते तर्हि कीद्दशं बैविध्यं कीद्दशी अराजकता तथा अल्पबोध्यता समापतेत्, तस्मिन् विषये सर्वैरेव अवज्ञायते। ताद्दशस्थित्यां भारतसर्वकारेण भारतस्य सर्वेषां भाषाविशेषज्ञानां विशेषतः संस्कृतविदुषां गहनचिन्तनेन सहयोगेन च भारतीयभाषाणां शब्दावली निर्मितः, यस्तु पञ्चाशीति प्रतिशतं संस्कृतनिष्ठः अस्ति। 'बृहत्पारिभाषिक -शब्दसंग्रह'[xxiv] इति सर्वविधविषयाणां शब्दकोशशृङ्खला भारत-सर्वकारेण प्रकाशितः इति

पूर्वमेव इक्तं, यत्र अधिकाधिकं शब्दाः संस्कृतनिष्ठाः। उच्चतम-न्यायालयेन घोषितं यत्, सम्पूर्णे भारतदेशे इमे शब्दाः एव प्रयुक्ताः भविष्यन्ति। संस्कृतसर्जकैः एषां शब्दानां प्रयोगेण भारते सर्वत्र ते शब्दाः बोधगम्याः भविष्यन्ति। विविधप्रकारकानुवादेन साम्प्रतिकसंस्कृतवाङ्मये भाषाशैलीगतपरिवर्तनाधुनिकशब्दनिर्माणादीनि बहुबिधानि परिवर्तनानि संसाधितानि, यस्मात् संस्कृतभाषारूपधारायाः केषुचिद्दशकेषु एव असामान्यं गतिपरिवर्तनं जातम्।

**सहायकग्रन्थपञ्जि**

1. ऋता चट्टोपाध्यायः, आधुनिक संस्कृत साहित्य १९१° - २०१° छोटगल्प ओ नाटक, प्रग्रेसिभ पावलिशार्स, कलकाता, एप्रिल, २°१२
2. कलानाथ शास्त्री, आधुनिक संस्कृत साहित्य एक दृष्टिपात्, इलाहावाद संग्रहालयः, इलाहावाद, १९९८
3. कलानाथ शास्त्री, संस्कृत के गौरव शिखर, राष्ट्रिय संस्कृत संस्थान, नवदेहली, १९९८
4. कृष्ण लाल, उर्वी, संस्कृतसाहित्य परिशीलन, जे.पी.पब्लिशिंग हाउस्, दिल्ली, २°°५
5. गोपेन्दु मुखोपाध्याय, संस्कृत साहित्येर इतिहवृत्त, इउनाइटेड बुक एजेन्सि, कोलकाता, २°१२
6. तपोधीर भट्टाचार्य, छोटगल्पेर प्रतिवेदन्, बङ्गीय साबित्य संसद, कलकाता, २°११
7. नवेन्दु सेन, वांला गद्य स्टाइलिस्टिकस्, महादिगन्त, जानुयारि, वारुइपुर, प.व., २°°१
8. नारायण गङ्गोपाध्याय, साहित्ये छोट गल्प, मित्र ओ घोष पावलिशार्स, कलकाता, श्रावण १४१२बङ्गा )१९९६इ ({तृतीयप्रकाशणम्}
9. मञ्जुलता शर्मा) सम्पा(., स.सम्पा -:प्रमोद भारतीय, अर्वाचीन संस्कृत साहित्य दशा एवं दिशा, परिमल पब्लिकेशन्स, दिल्ली, २°°४
10. मञ्जुलता शर्मा, आधुनिक संस्कृत साहित्य के नये भावबोध, संस्कृत ग्रन्थागार, दिल्ली, २°१°
11. राधावल्लभ त्रिपाठी, संस्कृत साहित्य : बीसवीं शताब्दी, राष्ट्रिय-संस्कृत-संस्थानम्, नवदेहली, १९९९
12. राधावल्लभत्रिपाठी, संस्कृतसाहित्यस्य विकासे पूर्वोत्तरराज्यानां योगदानम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २°११
13. तारापदभट्टाचार्य्य, कथाद्वादशः, संसाप, कोलकाता, २°°१
14. रवीन्द्रकुमारपण्डा, छिन्नछाया, अर्वाचीन-संस्कृत-साहित्यपरिषत्, बड़ोदा, २°°५
15. राजेन्द्रमिश्रः, रांगडा, इलाहाबाद, १९९२
16. कलानाथशास्त्री, कथानकवल्ली, रा.सं.अक.,जयपुर, १९८७
17. अन्तर्धनिः, प्रभूनाथद्विवेदीः, सम्पूर्णानन्द, बाराणसी, २°°५

---

[i] ज्ञाने धर्मः उत प्रयोगे, चमूकृष्णशास्त्री, संस्कृतभारती, नवदेहली

[ii] सम्भाषणसन्देशः, बेङ्गलुरू, Sept.1994

[iii] छिन्नछाया, रवीन्द्रनाथ पण्डा

[iv] श्यामली, कथाद्वादशः, तारापदः

[v] श्यामली, कथाद्वादशः, तारापदः

[vi] श्यामली, कथाद्वादशः, तारापदः

[vii] श्यामली, कथाद्वादशः, तारापदः

[viii] श्यामली, कथाद्वादशः, तारापदः

[ix] अथ भोजालकथा, कथाद्वादशः, तारापदः

[x] पट्टकाष्ठिका, कथाद्वादशः, तारापदः

[xi] राङ्गडा, डाँराजेन्द्रमिश्रः.

[xii] कथानकवल्ली, कलानाथशास्त्री,पृ.41

[xiii] कथानकवल्ली, कलानाथशास्त्री,पृ.39

[xiv] कथानकवल्ली, कलानाथशास्त्री,पृ.51

[xv] वैज्ञानिक तथा तकनीकी शब्दावली आयोग, 27 अप्रैल, 1960, http://www.cstt.education.gov.in/hi/

[xvi] संसेकृतभारती, 2011, नवदेहली

[xvii] सम्पर्कः, पराम्वा योगमाया, 2011

[xviii] सम्पर्कः, पराम्वा योगमाया, 2011

[xix] अपूपः, अन्तर्धनिः, प्रभूनाथद्विवेदी, 2008

[xx] रयीशः, उपर्युक्तम्, पृ.10

[xxi] तत्रैव।पृ.9

[xxii] अन्यच्च, उपर्युक्तम्, पृ.16,

[xxiii] पतंजलि, पातंजल महाभाष्य, प्रथम आह्निक

[xxiv] वैज्ञानिक तथा तकनीकी शब्दावली आयोग, 27 अप्रैल, 1960, http://www.cstt.education.gov.in/hi/